## पञ्चमः पाठः

# देशभक्तः चन्द्रशेखरः

## (देशभक्त चन्द्रशेखर)

### ( प्रथमं दृश्यम् )

*(**स्थानम्**–वाराणसीन्यायालयः, न्यायाधीशस्य पीठे एकः दुर्धर्षः पारसीकः तिष्ठति, आरक्षकाः चन्द्रशेखरं तस्य सम्मुखम् आनयन्ति। अभियोगः प्रारभते। चन्द्रशेखरः पुष्टाङ्गः, गौरवर्णः, षोडशवर्षीयः किशोरः।)*

**आरक्षकः** : श्रीमन्! अयम् अस्ति चन्द्रशेखरः। अयं राजद्रोही। गतदिने अनेनैव असहयोगिनां सभायाम् एकस्य आरक्षकस्य दुर्जयसिंहस्य मस्तके प्रस्तरखण्डेन प्रहारः कृतः येन दुर्जयसिंहः आहतः।

**न्यायाधीशः** : (तं बालकं विस्मयेन विलोकयन्) रे बालक! तव किं नाम?

**चन्द्रशेखरः** : आजादः (स्थिरीभूय)।

**न्यायाधीशः** : तव पितुः किं नाम?

**चन्द्रशेखरः** : स्वतन्त्रः।

**न्यायाधीशः** : त्वं कुत्र निवससि? तव गृहं कुत्रास्ति?

**चन्द्रशेखरः** : कारागार एव मम गृहम्।

**न्यायाधीशः** : (स्वगतम्) कीदृशः प्रमत्तः स्वतन्त्रतायै अयम्? (प्रकाशम्) अतीव धृष्टः, उद्दण्डश्चायं नवयुवकः। अहम् इमं पञ्चदश कशाघातान् दण्डयामि।

**चन्द्रशेखरः** : नास्ति चिन्ता।

### ( द्वितीयं दृश्यम् )

*(ततः दृष्टिगोचरो भवतः कौपीनमात्रावशेषः, फलकेन दृढं बद्धः चन्द्रशेखरः, कशाहस्तेन चाण्डालेन अनुगम्यमानः, कारावासाधिकारी गण्डासिंहश्च।)*

**गण्डासिंहः** : (चाण्डालं प्रति) दुर्मुख! मम आदेशसमकालमेव कशाघातः कर्त्तव्यः। (चन्द्रशेखरं प्रति) रे दुर्विनीत युवक! लभस्व इदानीं स्वाविनयस्य फलम्। कुरु राजद्रोहम्। दुर्मुख! कशाघातः एकः (दुर्मुखः चन्द्रशेखरं कशया ताडयति)।

**चन्द्रशेखरः** : जयतु भारतम्।

**गण्डासिंहः** : दुर्मुख! द्वितीयः कशाघातः। (दुर्मुखः पुनः ताडयति।) ताडितः चन्द्रशेखरः पुनः पुनः 'भारतं जयतु' इति वदति। (एवं स पञ्चदशकशाघातैः ताडितः) यदा चन्द्रशेखरः कारागारात् मुक्तः बहिः आगच्छति, तदैव सर्वे जनाः तं परितः वेष्टयन्ति, बहवः बालकाः तस्य पादयोः पतन्ति, तं मालाभिः अभिनन्दयन्ति च।

**चन्द्रशेखरः** : किमिदं क्रियते भवद्भिः? वयं सर्वे भारतमातुः अनन्यभक्ताः। तस्याः शत्रूणां कृते मदीयाः इमे रक्तबिन्दवः अग्निस्फुलिङ्गाः भविष्यन्ति।

('जयतु भारतम्' इति उच्चैः कथयन्तः सर्वे गच्छन्ति)

# || अभ्यास प्रश्न ||

## ➡ लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–**

(1) चन्द्रशेखरः कः आसीत्? **(2016CD,CG,17AD,19AG,20MB)**
(2) चन्द्रशेखरस्य रक्तबिन्दवः अग्निस्फुलिङ्गाः केषां कृते भविष्यन्ति?
(3) कस्य आरक्षकस्य मस्तकं प्रस्तरखण्डेन प्रहारेण आहतम् अभवत्?
(4) न्यायाधीशः कः आसीत्?
(5) न्यायाधीशः चन्द्रशेखरं कथम् अदण्डयत्?
(6) कारावासाधिकारिणः किं नाम आसीत्?
(7) दुर्मुखः कः आसीत्?
(8) चन्द्रशेखरः कथं बन्दीकृतः?
(9) चन्द्रशेखरः स्वनाम किम् अकथयत्?
(10) चन्द्रशेखरः स्वपितुः नाम किम् अकथयत्? **(2020MC,MD)**
(11) चन्द्रशेखरः स्वगृहं किम् अवदत्?
*अथवा* चन्द्रशेखरः स्वगृहं कुत्र किम् अवदत्? **(2016CA)**
(12) कशया ताडितः चन्द्रशेखरः पुनः पुनः किम् अवदत्? **(2017AG)**
*अथवा* प्रतिकशाघात पश्चात् चन्द्रशेखरः किम् अकथयत्? **(2017AE,19AB,AF)**
(13) 'स्वतन्त्रः' कस्य पितुः नाम?
(14) 'कारागार एव मम् गृहम्' कस्य वचनम् अस्ति?
(15) 'जयतु भारतम्' इति कथनम् कस्य कं प्रति च अस्ति?

## ➡ अनुवादात्मक प्रश्न

1. **निम्नलिखित संस्कृत गद्यांशों का ससन्दर्भ हिन्दी में अनुवाद कीजिए—**

(क) न्यायाधीशः —(तं बालकं ………………नवयुवकः।
*अथवा* आरक्षकः………………………………नास्ति चिन्ता। **(2017AB)**
(ख) दुर्मुख! मम्………………………………इति वदति।
(ग) ताडितः चन्द्रशेखरः ………………अभिनन्दयन्ति च।
(घ) यदा चन्द्रशेखरः……………………………भविष्यन्ति।
(ङ) आरक्षकः श्रीमन्! ………………………स्वतन्त्रः।
(च) गण्डासिंहः ………………………अभिनन्दयन्ति च।
(छ) ततः दृष्टिगोचरो………………………कुरु राजद्रोहम्।

**2. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**

(क) हमें देशभक्त होना चाहिए।

(ख) देशभक्त निर्भीक होते हैं।

(ग) भगतसिंह भी चतुर व निर्भीक राष्ट्रभक्त थे।

(घ) देशभक्तों का बलिदान प्रेरणाप्रद होता है।

(ङ) आजाद को बच्चों ने घेर लिया।

(च) हमें अपना कर्त्तव्य करना चाहिए।

(छ) सदा सत्य की जीत होती है।

## ➨ व्याकरणात्मक प्रश्न

(1) निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—
पुष्टाङ्गः, कुत्रास्ति, मात्रावशेषः, नास्ति।

(2) निम्न धातुओं में लकार, पुरुष एवं वचन बताइए—
तिष्ठति, दण्डयामि, जयतु, भविष्यन्ति।

## ➨ आन्तरिक मूल्यांकन

(1) 'देशभक्तः चन्द्रशेखरः' पाठ को पढ़ने के बाद आपको क्या शिक्षा मिलती है, अभिव्यक्त कीजिए।

(2) देश के स्वतन्त्रता संग्राम सेनानियों की एक सूची तैयार कीजिए।

# शब्दार्थ

**दुर्धर्षः** = कठिनाई से दबाये जाने योग्य (अदम्य)। **अभियोगः** = मुकदमा। **आरक्षक** = सिपाही। **प्रस्तर** = पत्थर। **स्थिरीभूय** = स्थिर, दृढ़ होकर। **कशा** = चाबुक, कोड़ा। **कौपीन** = लँगोटी। **पुनः-पुनः** = बार-बार। **तं परितः** = उसके चारों ओर। (परितः शब्द के साथ सदैव द्वितीया विभक्ति लगती है।) **वेष्टयन्ति** = घेर लेते हैं, चारों ओर एकत्र हो जाते हैं। **स्फुलिङ्गाः** = चिनगारियाँ। **लभस्व** = प्राप्त करो। (लभ् आत्मनेपदी धातु, लोट् लकार, मध्यम पुरुष, एकवचन)। **प्रमत्त** = मतवाला। **कारावासाधिकारी** = जेलर। **रक्तबिन्दवः** = रक्त की बूँद। **फलकेन** = हथकड़ियों से। **सम्मुखम्** = सामने। **खण्डेन** = पत्थर के टुकड़े से। **आहतः** = घायल हुआ। **कारागारः** = जेल। **धृष्टः** = ढीठ। **कशाघातान्** = कोड़े मारने की। **कशाघात कर्तव्यः** = (तुम) कोड़े मारना। **अभिनन्दयन्ति** = अभिनन्दन करते हैं। **अग्निस्फुलिङ्गा** = आग की चिनगारियाँ। **उच्चैः** = जोर से। **कशा** = कोड़ा। **पारसीक** = पारसी। **आनयन्ति** = ले आते हैं। **लभस्व** = प्राप्त करो। **आदेश-समकालमेव** = आज्ञा देते हैं।

●●